© 2016 IJSRST | Volume 2 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
International Journal of Scientific Research in Science and Technology

# साम्प्रतिकसमाजे धर्मशास्त्रस्य प्रासङ्गिकता



**डॉ. प्रदीप कुमार वाग्**

**सहायकाचार्यः, साहित्यविभागः,**

**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः**

**सारांशः**– धर्मशास्त्रे विज्ञानस्यापि महती चर्चा कृता दृश्यते। यद् भौतिकविज्ञानं सम्प्रति वैज्ञानिकदृष्ट्या उद्घोष्यते। तद् बहुकालात्पूर्वं मनुना समद्भावितम। तद्यथा - **आकाशं शब्दगुणक तस्मात् वायुः, वायोरग्निः, अग्नेर्जलं. जलाच्च पृथीवीति क्रमेण तत्तत् धर्मयुक्ता: सृष्टा अभूवन्।** यानि तथ्यानि धर्मशास्त्रेषूपलभ्यन्ते तानि साम्प्रतिकसमाजोपयोगाय अत्र संक्षेपेण मया प्रस्तूयन्ते।

धर्मार्थकाममोक्षेषु चतुर्थपुरुषार्थेषु धर्मस्यैव प्राधान्यं प्रामाण्यञ्चति सर्वेऽङ्गीकुर्वन्ति । **धर्मो[1] विश्वस्य जगत: प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति । धर्मेण पापमपनोदति, धर्मे सर्वं प्रतिष्ठितम्, तस्माद् धर्मं परं वदन्ति।** इत्यादिना धर्मस्य प्रशंसा साक्षाद् वेदेन कृता दरीदृश्यते। 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति [2]मनुवचनात् धर्मशास्त्रं स्मतिशब्देनाऽपि व्यवदिश्यते।[3] रघुवंशमहाकाव्ये कविकुलगुरुणा कालिदासेन श्रुतेरिवार्थं स्मृतिरन्वगच्छतीत्यादिना स्मृतेः प्रामाण्यं प्रतिपादितम्। पुनश्च –

**अग्निहोत्रं यथा कार्यं राजकार्यं तथैव हि ।**

**वेदोक्तत्वाद् स्मृतिप्रोक्तं कर्त्तव्यत्वान्मनीषिभिः**[4]।। इति ।

काव्यप्रकाशकृता मम्मटाचार्येण काव्यहेतुप्रसङ्गे शास्त्राणां छन्दव्याकरणाभिधानकोषकलाचतुर्वर्गजतुरगादिलक्षणग्रन्थानामिति वृत्तौ यत् चतुर्वर्गपदं प्रयुक्तं तेन धर्मार्थकाममोक्षाणां बोधनात् तत्प्रतिपादकस्य धर्मशास्त्रस्य प्रामाण्यं सुतरां प्रदर्शितम्। पुनश्च कौटिल्यार्थशास्त्रे –

**व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितः ।**

**त्रया च रक्षितो लोक : प्रसीदति न सीदति ।।[5]इति।**

एतेन वर्णाश्रमधर्मस्य प्रशंसा कुर्वता कौटिल्येन धर्मशास्त्रस्यापि प्रामाण्यं स्वीकृतम्। एवभूतं प्रामाणिकं यत् धर्मशास्त्रं तस्य युगे युगे प्रामाण्यं प्रासङ्गिकता च विद्यतैवेतीत्यत्र नास्ति सन्देहः । धर्मशास्त्रमिदं लोकोपकारक सामाजिकं शास्त्रम्। लोके शास्त्रस्य बहुलमुपयोगित्वं वर्तते। धर्मशास्त्रे पाप-प्रायश्चित्त-श्राद्ध-शुद्धि-देवार्चना-स्नान-होम-जप-तीर्थाटन-उपवासप्रभृतीनां कर्माणाम् अदृष्टैकफलत्वेन नास्तिकैरप्रतक्षीकृतत्वेन चाप्रामाण्यमिति यद्यपि केचन वदन्ति, तथापि सामाजिकवैज्ञानिकदृष्ट्या धर्मशास्त्रस्य प्रत्यक्षफलदायकत्वेन महत्युपादेयता विद्यते।धर्मशास्त्रे विज्ञानस्यापि महती चर्चा कृता दृश्यते। यद् भौतिकविज्ञानं सम्प्रति वैज्ञानिकदृष्ट्या उद्धोष्यते। तद् बहुकालात्पूर्वं [6]मनुना समद्भावितम। यथा - आकाशं शब्दगुणक तस्मात् वायुः, वायोरग्निः, अग्नेर्जलं. जलाच्च पृथीवीति क्रमेण तत्तत् धर्मयुक्ताः सृष्टा अभूवन्। यथोक्तं तेन –

**आकाशाज्जायते तस्मात् तस्य शब्दगुणं विदुः ।**

**आकाशात्तु विकुर्वाणात् सर्वगन्धवह : शुचिः ।।**

**बलवान् जायते वायुः स वै स्पर्शगुणो मतः ।**

**वायोरपि विकुर्वाणात् विरोचिष्णु तमोनुदम् ।।**

**ज्योतिरुत्पद्यते भास्वत् तद्रूपगुणमुच्यते।**

**ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः ।।**

**उद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः ।। इति ।**

पुनश्च प्राणीनां जीवनधारणार्थं जगति सुस्थपरिवेशस्य सुतरामावश्यकता विद्यते। परिवेषोऽयं यथा प्रदूषितो न स्यात् तदर्थं मनुना या व्यवस्था विहिता, साऽवश्यमवधेयाः । तत्रादौ जलप्रदूषणनिषेधार्थं **नाप्सु मूत्रं पूरीषं वा** इत्यादिना जले मलमूत्रोत्सर्जनस्य निषेधऽकारि[7]।

वस्त्रपूतं जलं पिबेदित्यादिना शुद्धजलस्य पानं सर्वदा तेनोपदिष्टम्। पुनश्च महायन्त्रप्रभृतीनां प्रवर्त्तनं, सर्वेष्वाकारेष्वधिकार औषधीनां हिंसा, इन्धनार्थं द्रुमच्छेद इत्यादीनामेकैकशो निषेधाद् वायोः, प्रदूषणं निवारितम्।

प्रसङ्गेऽस्मिन् यथोक्तं मनुना -

**सर्वाकरेष्वधिकारो महायन्त्रप्रवर्त्तनम् ।**

**इन्धनार्थमशुष्काणां द्रुमाणावपातनम् ।।**[8]

प्राणिनां श्वासप्रश्वासार्थमम्लजानसंज्ञको यो वायोरपेक्षते तस्य संग्रहो वृक्षादिभ्यो भवतीति हेतोः संप्रति शासकैः वृक्षच्छेदननिषेधस्य वृक्षरोपणविधेश्च प्रणयनं कृतम्। परन्तु तस्याः व्यवस्थायाः मूलं खलु धर्मशास्त्रम्।

धर्मशास्त्रेषु वृक्षच्छेदननिषेधस्य वृक्षरोपणविधेश्च प्रणयनं पापपुण्यादि भावनया व्यवस्थितं, येन जनानां तत्र निर्वृत्ति-प्रवृत्तिरूपो धर्मः परिपाल्यते। येन परिवेशस्य सुरक्षया सह प्रकृतेर्भारसाम्यं स्यात्। प्रसङ्गेऽस्मिन्

मनुना निगदितं यत् –

**फलदानान्तु वृक्षाणां च्छेदने जप्यमृक्शतम् ।**

**गुल्मबल्लीलतानाञ्च पुष्पितानाञ्च वीरूधाम् ।।**[9]

वनस्पतीनां सर्वेषामुपोयगो यथा यथा ।

**तथा तथा दमः कार्यो हिंसायामिति धारणा** ।। इति ।

पुनश्च

**अश्वत्थ एक पिचुमर्द एको**

**दौ चम्पको त्रीणि च केशराणि ।**

**सप्ताथ ताला नव नारिकेला**

**पञ्चाम्ररोपी नरकं न याति ।।इति ।**

धर्मशास्त्रेषु संस्काराणामनुष्ठानार्थं या व्यवस्था विहिता सा अदृष्टफलकेति साम्प्रतिकाः मन्यन्ते। परन्तु नेतत् समीचीनम्। संस्काराणां समाजिकी भूमिकाऽतीवमहत्वपूर्णागर्भाधानादारभ्य विवाहसंस्कारयावत् सर्वेषा संस्काराणां समाजिकमूल्यबोधः सुतरां विद्यते।शासनशुलार्थं मन्वादिधर्मशास्त्रकार्यो राजधर्मोपदिष्टः, दुष्टानां निग्रहार्थं या कठोरदण्डव्यवस्था विहिता, तस्माद् दण्डाद् भीता एव सर्वे जनाः श्रृङ्खलिता नरूपद्रवाश्चासन्। तात्कालीकिं शासनपद्धतिमनुसृत्य यदि सम्प्रति देशे शासकाः प्रवर्तेरन् तर्हि पुनरेवात्र रामराज्यस्य प्रतिष्ठा भवितुमर्हति। एवं धर्मशास्त्रेषु वह्वीयः व्यवस्थाः सन्ति। या काले काले युगे युगे च लोकानामुकारय कल्प्यन्ते। धर्मशास्त्रकमात्रं शास्त्रं, यस्यानुसारेण मे मानव पूर्णविकसितमनुष्यरूपेण श्रृङ्खलितं समाज सृष्ट्वा मानवता प्रतिष्ठापयितुं प्रभवत्। सम्प्रतिककाले

शास्त्रान्तरपेक्षया धर्मशास्त्रस्य महदुपादेयत्त्वं विद्यते, येन समग्रं लोकतन्त्रं श्रृङ्खलितं संयतं व्यवस्थितमुपकृतं च भवितुमर्हतीति।

एवं प्रकारेण संक्षेपेण अस्य विचारः मया प्रस्तुतः।

**सन्दर्भसूची**

1ण्तै. आर 10/63

2.मनुस्मृति. 2/9

3.रघु 3 सर्गः

4.रघु तृतीयसर्गे

5.कौ.अ.शा 1/3

6.म.स्मृ – 1/75,78

7.मनु.- ४/५६

8.मनु.- ११/६३

9.म.स्मृ – 11/142

**सन्दर्भग्रन्थसूची**


1. संस्कृतसाहहत्यस्य इहतहास् – प्रो.हरेकृष्णशतऩथी,हकताबमहऱ, कटक–१९९८ २२).
2. आधुनिकसंस्कृतकाव्यशास्त्रम् – डॉ आनन्दकुमार श्रीवास्तव्,ईटर्नप बुक् हऱकसप, हदल्ली
3. मम्मटः, काव्यप्रकाशः, “आज” भवन् सन्त कबीर मार्ग, वाराणसी(221001 यू.पी), जुलाई, 2016
4. संस्कृतसाहित्येतिहासः, आचार्य रामचन्द्रमिश्र, चौखम्बा- वाराणसी, 1970

5. संस्कृतसाहित्य का इतिहास, वाचस्पति गैरोला, चौखम्बासंस्करणम्, काशी

6. .संस्कृत व्याकरण दर्शन (हिन्दी), रामसुरेशत्रइपाठी, राजकमल प्रकाशन दिल्ली,1972

7. .संस्कृत शास्त्र का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969

8. मनुस्मृतिः, मोतीलाल बनारसीदास-दिल्ली,1983

9. अर्थशास्त्रम्, कौटील्यः, वाचस्पति गैरोला, चौखम्बासंस्करणम्, काशी